श्री परशुराम सहस्रनाम

अग्नि पुराण

पुरा दाशरथी रामः कृतोद्वाहः सबान्धवः ।
गच्छन् अयोध्यां राजेन्द्रः पितृ मातृ सुहृद्धतः ॥ 1 ॥

ददर्श यान्तं मार्गेण क्षत्रियान्तकरं विभुम् ।
रामं तं भार्गवं दृष्टवाभितः तुष्टाव राघवः ।
रामः श्रीमान् महाविष्णुः इति नाम सहस्रतः ॥ 2 ॥

अहं त्वत्तः परं राम विचरामि स्वलीलया ।
इत्युक्तवन्तं अभ्यर्च्य प्रणिपत्य कृताञ्जलिः ॥ 3 ॥

श्री राघव उवाच –

यन् नाम ग्रहणात् जन्तुः प्राप्नुयात्र भवापदम् ।
यस्य पादार्चनात् सिद्धिः स्वेप्सितां नौमि भार्गवम् ॥ 4 ॥

निःस्पृहो यः सदा देवो भूम्यां वसति माधवः ।
आत्मबोधोदधिं स्वच्छं योगिनं नौमि भार्गवम् ॥ 5 ॥

यस्मात् एतत् जगत् सर्वं जायते यत्र लीलया ।
स्थितिं प्राप्नोति देवेशं जामदग्न्यं नमाम्यहम् ॥ 6 ॥

यस्य भ्रूभङ्ग मात्रेण ब्रह्माद्याः सकलाः सुराः ।
शतवारं भवन्यत्र भवन्ति न भवन्ति च ॥ 7 ॥

तप उग्रं चचारादौ यमुद्दिश्य च रेणुका ।
आद्या शक्तिः महादेवी रामं तं प्रणमाम्यहम् ॥ 8 ॥

॥ अथ विनियोगः ॥

ॐ अस्य श्री जामदग्न्य सहस्रनाम स्तोत्र महामन्त्रस्य । श्री राम ऋषिः । जामदग्न्यः परमात्मा देवता । अनुष्टुप् छन्दः । श्रीमद् अविनाशि राम प्रीत्यर्थं चतुर्विध पुरुषार्थ सिद्ध्यर्थं जपे विनियोगः ॥

॥ अथ कर न्यासः ॥

ॐ ह्रां गोविन्दात्मने अङ्गुष्ठाभ्यां नमः ।
ॐ ह्रीं महीधरात्मने तर्जनीभ्यां नमः ।
ॐ ह्रूं हृषीकेशात्मने मध्यमाभ्यां नमः ।
ॐ ह्रैं त्रिविक्रमात्मने अनामिकाभ्यां नमः ।
ॐ ह्रौं विष्णवात्मने कनिष्ठिकाभ्यां नमः ।
ॐ ह्रः माधवात्मने करतल कर पृष्ठाभ्यां नमः ॥

॥ अथ हृदयादि न्यासः ॥

ॐ ह्रां गोविन्दात्मने हृदयाय नमः ।
ॐ महीधरात्मने शिरसे स्वाहा ।
ॐ हृषीकेशात्मने शिखायै वषट् ।
ॐ ह्रैं त्रिविक्रमात्मने कवचाय हुं ।
ॐ ह्रौं विष्णवात्मने नेत्र त्रयाय वौषट् ।
ॐ ह्रः माधवात्मने अस्त्राय फट् ।
ॐ भूर्भुवस्सुवरों इति दिक्बन्धः ॥

॥ अथ ध्यानम् ॥

शुद्ध जांबूनदनिभं ब्रह्मा विष्णु शिवात्मकम् ।
सर्वाभरण संयुक्तं कृष्नाजिनधरं विभुम् ॥ 9 ॥

बाण चापौ च परशुं अभयं च चतुर्भुजैः ।
प्रकोष्ठ शोभिरुदाक्षैः दधानं भृगुनन्दनम् ॥ 10 ॥

हेमयज्ञोपवीतं च स्निग्ध स्मित मुखांबुजम् ।
दर्भाञ्जितकरं देवं क्षत्रियक्षय दीक्षितम् ॥ 11 ॥

श्रीवत्सवक्षसं रामं ध्याते वै ब्रह्मचारिणम् ।
हृत्पुण्डरीक मध्यस्थं सनकाद्यैः अभिष्टुतम् ॥ 12 ॥

सहस्रमिव सूर्याणां एकी भूय पुरः स्थितम् ।
तपसामिव सन्मूर्तिं भृगुवंश तपस्विनम् ॥ 13 ॥

चूडाचुंबित कङ्कपत्रं अभिस्तूणी द्वयं पृष्ठतो ।
भस्म स्निग्ध पवित्र लाञ्छनवपुः धत्ते त्वचं रुरवी ॥ 14 ॥

मौञ्ज्या मेखलया नियन्त्रित मधोवासः च माञ्जिष्टकम् ।
पाणौ कार्मुकं अक्षसूत्र वलयं दण्डं पा पैप्पलम् ॥ 15 ॥

रेणुका हृदयानन्दं भृगुवंश तपस्विनम् ।
क्षत्रियाणां अन्तकं पूर्णं जामदग्न्यं नमाम्यहम् ॥ 16 ॥

अव्यक्त–व्यक्त रूपाय निर्गुणाय गुणात्मने ।
समस्त जगदाधार मूर्तये ब्रह्मणे नम : ॥ 17 ॥

॥ श्री परशुराम द्वादश नामानि ॥

हरिः परशुधारी च रामः च भृगुनन्दनः ।
एकवीरात्मजो विष्णुः जामदग्न्यः प्रतापवान् ॥ 18 ॥

सहयाद्रिवासी वीरः च क्षत्रजित् पृथिवीपतिः ।
इति द्वादश नामानि भार्गवस्य महात्मनः ।

यः त्रिकाले पठेन्नित्यं सर्वत्र विजयी भवेत् ॥ 19 ॥

॥ श्री परशुराम सहस्रनाम ॥

हरिः ॐ

ॐ रामः श्रीमान् महाविष्णुः भार्गवो जमदग्निजः ।
तत्त्वरूपी परं ब्रह्म शाश्वतः सर्वशक्तिधृक् ॥ 1 ॥

वरेण्यो वरदः सर्वसिद्धिदः कञ्जलोचनः ।
राजेन्द्रश्च सदाचारो जामदग्न्यः परात्परः ॥ 2 ॥

परमार्थैक निरतो जितामित्रो जनार्दनः ।
ऋषिप्रवर वन्द्यश्च दान्तः शत्रु विनाशनः ॥ 3 ॥

सर्वकर्मा पवित्रश्च च अदीनो दीनसाधकः ।
अभिवाद्यो महावीरः तपस्वी नियमप्रियः ॥ 4 ॥

स्वयंभूः सर्वरूपश्च सर्वात्मा सर्वदृक् प्रभुः ।
ईशानः सर्वदेवादिः वरीयान् सर्वगोऽच्युतः ॥ 5 ॥

सर्वज्ञः सर्ववेदादि शरण्यः परमेश्वरः ।
ज्ञानभाव्यो परिछेद्यः शुचिः वाग्मी प्रतापवान् ॥ 6 ॥

जितक्रोधो गुडाकेशो द्युतिमान् अरिमर्दनः ।
रेणुकातनयः साक्षात् अजितोऽव्यय एव च ॥ 7 ॥

विपुलांसो महोरस्कोऽतीन्द्रो वन्द्यो दयानिधिः ।
अनादिः भगवान् इन्द्रः सर्वलोकाऽरिमर्दनः ॥ 8 ॥

सत्यः सत्यव्रतः सत्यसन्धः परमधार्मिकः ।
लोकात्मा लोककृत् लोकवन्द्यः सर्वमयो निधिः ॥ 9 ॥

वश्यो दया सुधीर्गोप्ता दक्षः सर्वैकपावनः ।
ब्रह्मण्यो ब्रह्मचारी च ब्रह्म ब्रह्मप्रकाशकः ॥ 10 ॥

सुदरोऽजिनवासाः च ब्रह्मसूत्रधरः समः ।
सौम्यो महर्षिः शान्तश्च मौञ्जीभृत् दण्डधारकः ॥ 11 ॥

कोदण्डी सर्वजित् क्षत्र दर्पहा पुण्यवर्धनः ।
कविः ब्रह्मर्षी वरदः कमण्डलुधरः कृती ॥ 12 ॥

महोदारो अतुलो भाव्यो जितषड्वर्ग मण्डलः ।
कान्तः पुण्यः सुकीर्तिश्च द्विभुजः च आदिपुरुषः ॥ 13 ॥

अकल्मषो दुराराध्यः सर्वावासः कृतागमः ।
वीर्यवान् स्मितभाषी च निवृत्तात्मा पुनर्वसुः ॥ 14 ॥

आध्यात्मयोग कुशलः सर्वायुध विशारदः ।
यज्ञस्वरूपी यज्ञेशो यज्ञपालः सनातनः ॥ 15 ॥

घनश्यामः स्मृतिः शूरो जरामरणवर्जितः ।
धीरो दान्तः सुरूपश्च सर्वतीर्थमयो विधिः ॥ 16 ॥

वर्णी वर्णाश्रमगुरुः सर्वजित् पुरुषोऽव्ययः ।
शिवशिक्षापरो युक्तः परमात्मा परायणः ॥ 17 ॥

प्रमाणरूपो दुर्ज्ञेयः पूर्णः क्रूरः क्रतुर्विभुः ।
आनन्दोऽथ गुणश्रेष्ठो अनन्तदृष्टीः गुणाकरः ॥ 18 ॥

धनुर्धरो धनुर्वेदः सच्चिदानन्द विग्रहः ।
जनेश्वरो विनीतात्मा महाकायः तपस्विराट् ॥ 19 ॥

अखिलाद्यो विश्वकर्मा विनीतात्मा विशारदः ।
अक्षरः केशवः साक्षी मरीचिः सर्वकामदः ॥ 20 ॥

कल्याणः प्रकृतिः कल्पः सर्वेशः पुरुषोत्तमः ।
लोकाध्यक्षो गभीरोऽथ सर्वभक्त वरप्रदः ॥ 21 ॥

ज्योतिः आनन्दरूपश्च वह्नीरक्षय आश्रमी ।
भूर्भुवः स्वः तपोमूर्तीः रविः परशुधृक् स्वराट् ॥ 22 ॥

बहुश्रुतः सत्यवादी भ्राजिष्णुः सहनोबलः ।
सुखदः कारनं भोक्ता भवबन्ध विमोक्षकृत् ॥ 23 ॥

संसारतारको नेता सर्वदुःख विमोक्षकृत् ।
देव चूडामणिः कुन्दः सुतपा ब्रह्मवर्धनः ॥ 24 ॥

नित्यो नियत कल्याणः शुद्धात्मा अथ पुरातनः ।
दुःस्वप्न नाशनो नीतिः किरीटी स्कन्द दर्पहृत् ॥ 25 ॥

अर्जुनप्राणहा वीरः सहस्रभुज जितधारीः ।
क्षत्रियान्तकरः शूरः क्षितिभार करान्तकृत् ॥ 26 ॥

परश्वधधरो धन्वी रेणुका वाक्य तत्परः ।
वीरहा विषमो वीरः पितृवाक्य परायणः ॥ 27 ॥

मातृप्राणद ईशश्च धर्मतत्त्व विशारदः ।
पितृक्रोधहरः क्रोधः सप्तजिह्व समप्रभः ॥ 28 ॥

स्वभावभद्रः शत्रुघ्नः स्थाणुः शंभुश्च केशवः ।
स्थविष्ठः स्थविरो बालः सूक्ष्मो लक्ष्यद्युतिर्महान् ॥ 29 ॥

ब्रह्मचारी विनीतात्मा रुद्राक्षवलयः सुधीः ।
अक्षकर्णः सहस्रांशुः दीप्तः कैवल्य तत्परः ॥ 30 ॥

आदित्यः कालरुद्रश्च कालचक्र प्रवर्तकः ।
कवची कुण्डली खड्गी चक्री भीम पराक्रमः ॥ 31 ॥

मृत्युन्जयो वीरसिंहो जगदात्मा जगत्गुरुः ।
अमृत्युः जन्मरहितः कालज्ञानी महापटुः ॥ 32 ॥

निष्कलङ्को गुणग्रामो अनिर्विण्णः स्मररूपधृक् ।
अनिवेद्यः शतावर्तो दण्डो दमयिता दमः ॥ 33 ॥

प्रदानः तारको धीमांस तपस्वी भूतसारथिः ।
अहः संवत्सरो योगी संवत्सरकरो द्विजः ॥ 34 ॥

शाश्वतो लोकनाथश्च च शाखी दण्डी बली जटी ।
कालयोगी महानन्दःतिग्ममन्युः सुवर्चसः ॥ 35 ॥

अमर्षणो मर्षणात्मा प्रशान्तात्मा हुताशनः ।
सर्ववासाः सर्वचारी सर्वाधारो विरोचनः ॥ 36 ॥

हैमो हेमकरो धर्मो दुर्वासा वासवो यमः ।
उग्रतेजा महातेजा जयो विजयः कालजित् ॥ 37 ॥

सहस्रहस्तो विजयो दुर्धरो यज्ञभागभुक् ।
अग्निर्ज्वाली महाज्वालः त्वतिधूमो हुतो हविः ॥ 38 ॥

स्वस्तिदः स्वस्तिभागश्च महान भर्ग परो युवा ।
महापादो महाहस्तो बृहत्कायो महायशाः ॥ 39 ॥

महाकटिः महाग्रीवो महाबाहुः महाकरः ।
महानासो महाकंबुः महामायः पयोनिधिः ॥ 40 ॥

महावक्षा महौजाश्च महाकेशो महाजनः ।
महामूर्धा महामात्रो महाकर्णो महाहनुः ॥ 41 ॥

वृक्षाकारो महाकेतुः महादंष्ट्रो महामुखः ।
एकवीरो महावीरो वसुदः कालपूजितः ॥ 42 ॥

महामेघः निनादी च महाघोषो महाद्युतिः ।
शैवः शैवागमाचारी हैहयानां कुलान्तकः ॥ 43 ॥

सर्वगुह्यमयो वज्री बहुलः कर्मसाधनः ।
कामी कपिः कामपालः कामदेवः कृतागमः ॥ 44 ॥

पञ्चविंशति तत्त्वज्ञः सर्वज्ञः सर्वगोचरः ।
लोकनेता महानादः कालयोगी महाबलः ॥ 45 ॥

असङ्ख्येयो अप्रमेयात्मा वीर्यकृत् वीर्यकोविदः ।
वेदवेद्यो वियद्गोप्ता सर्वाऽमर मुनीश्वरः ॥ 46 ॥

सुरेशः शरणं शर्म शब्दब्रह्म सतांगतिः ।
निर्लेपो निष्प्रपञ्चात्मा निर्व्यग्रो व्यग्रनाशनः ॥ 47 ॥

शुद्धः पूतः शिवारंभः सहस्रभुजजित् हरिः ।
निरवद्य पदोपाय सिद्धिदः सिद्धिसाधनः ॥ 48 ॥

चतुर्भुजो महादेवो व्यूढरस्को जनेश्वरः ।
द्युतिमणिः तरणिः धन्यः कार्तवीर्य बलापहा ॥ 49 ॥

लक्ष्मणाग्रजः वन्द्यश्च नरो नारायण प्रियः ।
एकं ज्योतिः निरातङ्को मत्स्यरूपी जनप्रियः ॥ 50 ॥

सुप्रीतः सुमुखः सूक्ष्मः कूर्मो वाराहकः तथा ।
व्यापको नारसिंहश्च बलजित् मधुसूदनः ॥ 51 ॥

अपराजितः सर्वसहो भूषणो भूतवाहनः ।
निवृत्तः संवृत्तः शिल्पी क्षुद्रहा नित्यसुन्दरः ॥ 52 ॥

स्तव्यः स्तवप्रियः स्तोता व्यासमूर्तिः अनाकुलः ।
प्रशान्तबुद्धिः अक्षुद्रः सर्वसत्त्वावलंबनः ॥ 53 ॥

परमार्थगुरुः देवो माली संसारसारथिः ।
रसो रसज्ञः सारज्ञः कङ्कणीकृत वासुकिः ॥ 54 ॥

कृष्णः कृष्णस्तुतो धीरो मायातीतो विमत्सरः ।
महेश्वरो महीभर्ता शाकल्यः शर्वरीपतिः ॥ 55 ॥

तटस्थः कर्णदीक्षादः सुराध्यक्षः सुरारिहा ।
ध्येयोऽग्रधुर्यो धात्रीशो रुचिः त्रिभुवनेश्वरः ॥ 56 ॥

कर्माध्यक्षो निरालंबः सर्वकाम्यः फलप्रदः ।
अव्यक्तलक्षणो व्यक्तो व्यक्तऽव्यक्तो विशांपतिः ॥ 57 ॥

त्रिलोकात्मा त्रिलोकेशो जगन्नाथो जनेश्वरः ।
ब्रह्मा हंसश्च रुद्रश्च स्रष्टा हर्ता चतुर्मुखः ॥ 58 ॥

निर्मदो निरहङ्कारो भृगुवंशोद्वहः शुभः ।
वेधा विधाता द्रुहिणो देवज्ञो देवचिन्तनः ॥ 59 ॥

कैलासशिखरवासी ब्राह्मणो ब्राह्मणप्रियः ।
अर्थोऽनर्थो महाकेशो ज्येष्ठः श्रेष्ठः शुभाकृतिः ॥ 60 ॥

बाणारिः दमओ यज्वा स्निग्धप्रकृतिः अग्नियः ।
वरशीलो वरगुणः सत्यकीर्तिः कृपाकरः ॥ 61 ॥

सत्त्ववान् सात्त्विको धर्मी बुद्धः कल्की सदाश्रयः ।
दर्पणो दर्पहा दर्पाऽतीतो दृप्तः प्रवर्तकः ॥ 62 ॥

अमृताशो अमृतवपुः वाङ्मयः सदसन्मयः ।
निधानगर्भो भूशायी कपिलो विश्वभोजनः ॥ 63 ॥

प्रभविष्णुः ग्रसिष्णुश्च चतुर्वर्ग फलप्रदः ।
नारसिंहो महाभीमः शरभः कलिपावनः ॥ 64 ॥

उग्रः पशुपतिः भर्गो वैद्यः केशीनिशूदनः ।
गोविन्दो गोपतिर्गोप्ता गोपालो गोपवल्लभः ॥ 65 ॥

भूतावासो गुहावासः सत्यवासः श्रुतागमः ।
निष्कण्टकः सहस्रार्चिः स्निग्धः प्रकृति दक्षिणः ॥ 66 ॥

अकंपितो गुणग्राही सुप्रीतः प्रीतिवर्धनः ।
पद्मगर्भो महागर्भो वज्रगर्भो जलोद्भवः ॥ 67 ॥

गभस्तिः ब्रह्मकृद् ब्रह्म राजराजः स्वयंभवः ।
सेनानीः अग्रणी साधुः बलस्तालिकरो महान् ॥ 68 ॥

पृथिवी वायुः आपश्च तेजः खं बहुलोचनः ।
सहस्रमूर्धा देवेन्द्रः सर्वगुह्यमयो गुरुः ॥ 69 ॥

अविनाशी सुखारामः त्रिलोकी प्राणधारकः ।
निद्रारूपं क्षमा तन्द्रा धृतिः मेधा स्वधा हविः ॥ 70 ॥

होता नेता शिवः त्राता सप्तजिह्वो विशुद्धपात् ।
स्वाहा हव्यश्च कव्यश्च शतघ्नी शतपाशधृत् ॥ 71 ॥

आरोहश्च निरोहश्च तीर्थ तीर्थकरो हरः ।
चराचरात्मा सूक्ष्मःतु विवस्वान् सवितामृतम् ॥ 72 ॥

तुष्टीः पुष्टीः कला काष्ठा मासः पक्षः तु वासरः ।
ऋतुः युगादि कालः तु लिङ्गं आत्माऽथ शाश्वतः ॥ 73 ॥

चिरञ्जीवी प्रसन्नात्मा नकुलः प्राणधारणः ।
स्वर्गद्वारं प्रजाद्वारं मोक्षद्वारं त्रिविष्टपम् ॥ 74 ॥

भुक्तिः लक्ष्मीः तथा मुक्तिः विरजा विरजांबरः ।
विश्वक्षेत्रं सदाबीजं पुण्यश्रवणकीर्तनः ॥ 75 ॥

भिक्षुः भैक्ष्यं गृहं दारा यजमानश्च याचकः ।
पक्षी च पक्षवाहश्च मनोवेगो निशाचरः ॥ 76 ॥

गजहा दैत्यहा नाकः पुरूहुतः पुरुष्टुतः ।
बान्धवो बन्धुवर्गश्च पिता माता सखा सुतः ॥ 77 ॥

गायत्रीवल्लभः प्रांशुरमान्धाता भूतभावनः ।
सिद्धार्थकारी सर्वार्थदः छन्दो व्याकरणं श्रुतिः ॥ 78 ॥

स्मृतिः गाथोपशान्तश्च पुराणः प्राणचञ्चुरः ।
वामनश्च जगत्कालः सकृतश्च युगाधिपः ॥ 79 ॥

उद्गीतः प्रणवो भानुः स्कन्दो वैश्रवणः तथा ।
अन्तरात्मा हृषीकेशः पद्मनाभः स्तुतिप्रियः ॥ 80 ॥

परश्वधायुधः शाखी सिंहगः सिंहवाहनः ।
सिंहनादः सिंहदंष्ट्रो नगो मन्दरधृक् शरः ॥ 81 ॥

सह्याचलनिवासी च महेन्द्रकृत संश्रयः ।
मनोबुद्धिः अहङ्कारः कमलानन्दवर्धनः ॥ 82 ॥

सनातनतमः स्रग्वी गदी शङ्खी रथाङ्गभृत् ।
निरीहो निर्विकल्पश्च समर्थोऽनर्थनाशनः ॥ 83 ॥

अकायो भक्तकायश्च माधवोऽथ सुरार्चितः ।
योद्धा जेता महावीर्यः शङ्करः सन्ततः स्तुतः ॥ 84 ॥

विश्वेश्वरो विश्वमूर्तिः विश्वरामोऽथ विश्वकृत् ।
आजानुबाहुः सुलभः परं ज्योतिः सनातनः ॥ 85 ॥

वैकुण्ठः पुण्डरीकाक्षः सर्वभूताशयस्थितः ।
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥ 86 ॥

ऊर्ध्वरेता ऊर्ध्वलिङ्ग प्रवरो वरदो वरः ।
उन्मत्तवेशः प्रच्छन्नः सप्तद्वीपमहिप्रदः ॥ 87 ॥

द्विजधर्म प्रतिष्ठाता वेदात्मा वेदकृच्छ्रयः ।
नित्यः संपूर्णकमाश्च सर्वज्ञः कुशलागमः ॥ 88 ॥

कृपा पीयूष जलधिः धाता कर्ता परात्परः ।
अचलो निर्मलः तृप्तः स्वे महिम्नि प्रतिष्ठितः ॥ 89 ॥

असहायः सहायश्च जगद्धेतुरकारणः ।
मोक्षदः कीर्तिश्चैव प्रेरकः कीर्तिनायकः ॥ 90 ॥

अधर्मशत्रुः अक्षोभ्यो वामदेवो महाबलः ।
विश्ववीर्यो महावीर्यो श्रीनिवासः सतांगतिः ॥ 91 ॥

स्वर्णवर्णो वराङ्गश्च सद्योगी च द्विजोत्तमः ।
नक्षत्रमाली सुरभिः विमलो विश्वपावनः ॥ 92 ॥

वसन्तो माधवो ग्रीष्मो नभस्यो बीजवाहनः ।
निदाघः तपनो मेघो नभो योनिः पराशरः ॥ 93 ॥

सुखानिलः सुनिष्पन्नः शिशिरो नरवाहनः ।
श्रीगर्भः कारणं जप्यो दुर्गः सत्यपराक्रमः ॥ 94 ॥

आत्मभूः अनिरुद्धश्च दत्तात्रेयः त्रिविक्रमः ।
जमदग्निः बलनिधिः पुलस्त्यः पुलहोऽङिगराः ॥ 95 ॥

वर्णी वर्णगुरुः चण्डः कल्पवृक्षः कलाधरः ।
महेन्द्रो दुर्भरः सिद्धो योगाचार्यो बृहस्पतिः ॥ 96 ॥

निराकारो विशुद्धश्च व्याधिहर्ता निरामयः ।
अमोघोऽनिष्टमथनो मुकुन्दो विगतज्वरः ॥ 97 ॥

स्वयंज्योतिः गुरूत्तमः सुप्रसादोऽचलः तथा ।
चन्द्रः सूर्यः शनिः केतुः भूमिजः सोमनन्दनः ॥ 98 ॥

भृगुः महातपा दीर्घतपा सिद्धो महागुरुः ।
मन्त्री मन्त्रयिता मन्त्रो वाग्मी वसुमनाः स्थिरः ॥ 99 ॥

अद्रिः अद्रिशयो शंभुः माङ्गल्यो मङ्गलोवृतः ।
जयस्तंभो जगत्स्तंभो बहुरूपो गुणोत्तमः ॥ 100 ॥

सर्वदेवमयो अचिन्त्यो देवात्मा विरूपधृक् ।
चतुर्वेदः चतुर्भावः चतुरः चतुरप्रियः ॥ 101 ॥

आद्यन्तशून्यो वैकुण्ठः कर्मसाक्षी फलप्रदः ।
दृढायुधः स्कन्दगुरुः परमेष्ठी परायणः ॥ 102 ॥

कुबेरबन्धुः श्रीकण्ठो देवेशः सूर्यतापनः ।
अलुब्धः सर्वशास्त्रज्ञः शास्त्रार्थः परमः पुमान् ॥ 103 ॥

अग्न्यास्यः पृथिवीपादो द्युमूर्धा दिक्श्रुतिः परः ।
सोमान्तः करणो ब्रह्ममुखः क्षत्रभुजः तथा ॥ 104 ॥

वैश्योरू शूद्रपादः तु नदी सर्वाङ्गसन्धिकः ।
जीमूतकेशोऽब्धि कुक्षिः तु वैकुण्ठो विष्टरश्रवाः ॥ 105 ॥

क्षेत्रज्ञः तमसः पारी भृगुवंशोद्भवो अवनिः ।
आत्मयोनि रैणुकेयो महादेवो गुरु सुरः ॥ 106 ॥

एकोनैकोऽक्षरः श्रीशः श्रीपतिः दुःखभेषजम् ।
हृषीकेशो अथ भगवान सर्वात्मा विश्वपावनः ॥ 107 ॥

विश्वकर्मा अपवर्गो अथ लंबोदर शरीरधृक् ।
अक्रोधो अद्रोह मोहश्च सर्वतो अनन्तधृक् तथा ॥ 108 ॥

कैवल्यदीपः कैवल्यः साक्षी चेता विभावसुः ।
एकवीरात्मजो भद्रोऽभद्रहा कैटभार्दनः ॥ 109 ॥

विबुधो अग्रवरः श्रेष्ठः सर्वदेवोत्तमोत्तमः ।
शिवध्यानरतो दिव्यो नित्ययोगी जितेन्द्रियः ॥ 110 ॥

कर्म सत्यं व्रतं चैव भक्तानुग्रहकृत् हरिः ।
सर्गस्थित्यन्तकृत् रामो विद्याराशिः गुरूत्तमः ॥ 111 ॥

रेणुकाप्राणलिङ्गं च भृगुवंश्यः शतक्रतुः ।
श्रुतिमान् एकबन्धुश्च च शान्तभद्रः समञ्जसः ॥ 112 ॥

आध्यात्मविद्यासारश्च कालभक्षो विशृङ्खलः ।
राजेन्द्रो भूपतिः योगी निर्मायो निर्गुणो गुणी ॥ 113 ॥

हिरण्मयः पुराणश्च बलभद्रो जगत्प्रदः ।
वेदवेदाङ्गपारज्ञः सर्वकर्मा महेश्वरः ॥ 114 ॥

॥ फलश्रुतिः ॥

एवं नाम्नां सहस्रेण तुष्टाव भृगुवंशजम् ।
श्रीरामः पूजयामास प्रणिपात पुरः सरम् ॥ 1 ॥

कोटिसूर्य प्रतीकाशो जटामुकुटभूषितः ।
वेदवेदाङ्गपारज्ञः स्वधर्मनिरतः कविः ॥ 2 ॥

ज्वालामालावृतो धन्वी तुष्टः प्राह रघोत्तमम् ।
सर्वैश्वर्यं समायुक्तं तुभ्यं प्रादां रघोत्तमम् ॥ 3 ॥

स्वतेजो निर्गतं तस्मात् प्राविशद् राघवं ततः ।
यदा विनिर्गतं तेजः ब्रह्माद्याः सकलाः सुराः ॥ 4 ॥

चेलुश्च ब्रह्मसदनं च कंपे च वसुन्धरा ।
ददाह भार्गवं तेजः प्रान्ते वै शतयोजनाम् ॥ 5 ॥

अधस्ताद् ऊर्ध्वतश्चैव हाहेति कृतवाञ्जनः ।
तदा प्राह महायोगी प्रहसन् इव भार्गवः ॥ 6 ॥

श्री भार्गव उवाच –

माभैष्ट सैनिका रामो मत्तो भिन्नो न नामतः ।
रूपेणा प्रतिमेनापि महदाश्चर्यं अद्भुतम् ॥। 7 ॥

श्री राम उवाच –

यद् रूपं भवतो लब्धं सर्वलोक भयङ्करम् ।
हितं च जगतां तेन देवानां दुःखशातनम् ॥ 8 ॥

जनार्दन करोमि यद्य विष्णो भृगुकुलोद्वह ।
आशीषो देहि विप्रेन्द्र भार्गवः तदनन्तरम् ॥ 9 ॥

उवाच आशीर्वचो योगी राघवाय महात्मने ।
परं प्रहर्षं आपन्नो भगवान रामं अब्रवीत् ॥ 10 ॥

श्री भार्गव उवाच –

धर्मे दृढत्वं युधि शत्रुघातो यशः तथाद्यं परमं बलं च ।
योगप्रियत्वं मम सन्निकर्षः सदाऽस्तु ते राघव राघवेश ॥ 11 ॥

तुष्टोऽथ राघवः प्राह मया प्रोक्तं स्तवं तव ।
यः पठेत् श्रुणुयात् वापि श्रावयेत् वा द्विजोत्तमान् ॥ 12 ॥

द्विजेष्वकोपं पितृतः प्रसादं शतं समानं उपभोगयुक्तम् ।
कुले प्रसूतिं मातृतः प्रसादं समां प्राप्तिं प्राप्नुयात् चापि दाक्ष्यम् ।
प्रीतिं चाग्र्यां बान्धवानां निरोगं कुलं प्रसूतैः पौत्रवर्गैः समेतम् ॥ 13 ॥

अश्वमेधस्य सहस्रेण फलं भवति तस्य वै ।
धृताद्यैः स्नापयेत् रामं स्थाल्यां वै कलशे स्थितम् ॥ 14 ॥

नाम्नां सहस्रेणानेन श्रद्धया भार्गवं हरिम् ।
सोऽपि यज्ञसहस्रस्य फलं भवति वाञ्छितम् ॥ 15 ॥

पूज्यो भवति रुद्रस्य मम चापि विशेषतः ।
तस्मान् नाम्नां सहस्रेण पूजयेत् यो जगत्गुरुम् ॥ 16 ॥

जपन् नाम्नां सहस्रं च स याति परमां गतिम् ।
श्रीः कीर्तिः धीरः धृतिः तुष्टिः सन्ततिश्च निरामय ॥ 17 ॥

अणिमा लघिमा प्राप्तिः ऐश्वर्याद्याश्च च सिद्धयः ।
सर्वभूत सुहृत्वं च लोके वृद्धीः परामतिः ॥ 18 ॥

भवेत् प्रातः च मध्यान्हे सायं च जपतो हरे : ।
नामानि ध्यायतो राम सान्निध्यं च हरेः भवेत् ॥ 19 ॥

अयने विषुवे चैव जपन्त्वालिख्य पुस्तकम् ।
दद्यात् वै यो वैष्णवेभ्यो नष्टबन्धो न जायते ॥ 20 ॥

न भवेत् च कुले तस्य कश्चित् लक्ष्मी विवर्जितः ।
वरदो भार्गवः तस्य लभते च सतां गतिम् ॥ 21 ॥

॥ इति श्री अग्नि महापुराणे दाशरथि राम प्रोक्तं श्री परशुराम सहस्रनाम संपूर्णम् ॥